Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथावरणदेवतामन्त्राश्च केचिल्लिख्यन्ते —

अघोर ऋषिः । विराट् छन्दः । भैरवो देवता । भं बीजम् । फट् शक्तिः । अभीष्टसिध्यर्थे विनियोगः । भां इत्यादिना करन्यासं एतेनैव षडङ्गं च ॥

कालाम्बुदश्यामलमानतास्यं कराळमव्याहतमप्रमेयम् ।
लोलालकं लोकविनाशहेतुं लुठद्रिपुं नौमि धृताट्टहासम् ॥

ओं नमो भगवते उग्रभैरवाय सर्वविघ्नं नाशय ठठ स्वाहा । चतुर्विंशति-सहस्रजपः ॥

अनलभवनमध्ये शक्तिबीजं फडर्णं
हरिहर जय हुंफट् चाष्टकोणे ससाध्यम् ।
बहिरथ वसुपत्रे मूलमन्त्रत्रिवर्णान्
भुवमथ लिपिवीतं भैरवं वैरिवज्रम् ॥

अस्यार्थः — प्रथमं त्रिकोणं तन्मध्ये ह्रीं फट् इति, तद्बहिरष्टकोणं, तत्कोणेषु हरिहर जय हुंफट् इति विलिखेत् । तद्बहिरष्टदळेषु मूलमन्त्र-त्रिवर्णं, तद्बहिश्चतुरश्रं, तद्बहिर्मातृकया वेष्टयेत् ॥

भैरवं वह्निकोणे समर्चयेत् । अष्टकोणेषु भैरव्यै० अघोराय० गणेशाय० स्कन्दाय० विष्णवे० दक्षिणामूर्तये० चण्डोद्दण्डगणेशाय० आपदुद्धारणाय० इति यथाक्रमं समर्चयेत् । दळान्ते अष्टमातरः पूज्याः । नरान्तकाय० विजयाय० भीमाय० रक्तभैरवाय० इति प्रतीच्यादिदिक्षु समर्चयेत ॥ इति भैरवपूजाविधिः ॥